International Journal of Sanskrit Research 2022; 8(3): 331-334

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(3): 331-334
© 2022 IJSR
www.anantaajournal.com
Received: 09-03-2022
Accepted: 16-04-2022

**राजकृष्णन् वि के**
शोधप्रबन्धछात्रः एस्. सि. एस्.
विश्वमहाविद्यालयः एनात्तूर्
काञ्चीपुरम्, तमिल्नाटु, भारत

Corresponding Author:
**राजकृष्णन् वि के**
शोधप्रबन्धछात्रः एस्. सि. एस्.
विश्वमहाविद्यालयः एनात्तूर्
काञ्चीपुरम्, तमिल्नाटु, भारत

# उत्तरकेरले मूषिकवंशस्वाधीनम्

**राजकृष्णन् वि के**

## प्रस्तावना

अतुलकवि विरचित मूषकवंशमहाकाव्ये प्रयुक्तेषु उत्तरमलबार् प्रदेशस्य अनेकेषु नामसु संस्कृत तद्भव तत्सम सादृश्यं द्रष्टुं शक्नोति । किन्तु संस्कृतनामसु कालान्तरे बहुविधपरिवर्तनानि जातानि । अपि च आङ्गलशासनकालतः तेषामुच्चारणवैकृतानि पश्चादस्माभिरपि अनुवर्ततेति यथेष्टं निदर्शनानि दृश्यन्ते। यतो हि तदानीन्तन नामानि आधुनिक नामानि च अवलोकयामस्तर्हि स्थलनामानां पठनं भावनायाः ऊहस्य च हेतुः माभूत्, सूक्ष्मान्वेषणाय विवरणाय च पात्रीभूतो भवेत् । तन्नामानामाधार-भूतानि तु भूप्रकृतिः, वृक्षाः, गह्वराणि, लघुशिखराः, नद्यः, मन्दिराणि, समाजे विद्यमान जात्युपजातयश्चानकानि कारणानि भवन्ति । कस्यचनप्रदेशस्य भूप्रकृतिः पौराणिकरेखाभिः च समं तादात्म्यं भजतेत्यतः नामकरणे विशिष्टाः वस्तुताः वर्ततेति भाषापरिज्ञानकुतुकानां जिज्ञासां जनयेत् ।

कण्णूर्जनपदः, कोषिक्कोट् जनपदस्य एलत्तूर् नद्याः उत्तरभागः च मिलित्वा विद्यमान प्रदेशः एव कोलदेशः । पोरत्तुगीस् भरणाधिकारिणा "मौण्ड् डि एलि" प्रभृतिभिः रामन्तलि प्रदेशं केन्द्रीकृत्य तत्परिधौविद्यमानदेशानाहृत्य एषिमला इति व्यवहृततम्। प्रादेशिकभूपानाम् भरणसिराकेन्द्रम् पौराणिककालतः "तलि" इति कथ्यमानमासीत् । एलिगिरेः पश्चिमपार्श्वस्थनद्याः तथा आरबसागरस्य च मध्ये द्वीप इव विद्यमानः कश्चन प्रदेशः भवति रामन्तलिः। मूषिकवंशस्थापकस्य राज्ञः रामघटमूषिकस्य आस्थानम् रामन्तलिः अभवत् । तत्पश्चात् 'इरामकूटमूवर्' इति भाषायामाहूतेति कारणतः इरामं इति उपराजधानिरपि विश्रुताभवत् । तदधुना 'एरमं', 'ऐरमं' इत्यादिभिः नामभिः व्यवह्रियमाणोऽजायत । एतत्तथ्यं स्पष्टीक्रियमाणः शिलालेखोऽपि ततस्समुपलब्धाः आसन् । मूषिकः इत्युक्ते कश्चन क्षुद्रप्राणिविशेषः, तस्यावासभूमिरिति केचित् एषिमला इत्युद्घुष्टम् । प्रथमास्थानाय स्वीकृते देशे 'नेन्मेनिवाक' इति प्रसिद्धैः शिरीषवृक्षैः आवृतप्रदेशः इत्यतः मूषिकवंशः इति नाम स्वीचकार नेन्मेनि वृक्षविशेषस्यापि पर्यायपदो भवति

मूषिक इति तेषां वृक्षाणमाधिक्यादपि मूषिकवंशमित्युक्तिः प्रसिद्धिमाप्तं इत्यपि श्रूयते । माहिष्मती नृपतेः गर्भिणी पट्टमहिषी कुलाचार्यस्य साहाय्येन समुद्रमार्गेण लघुनौकया पश्चिमकेरलतटं प्राप्य गिरिमधिरुह्य मूषिकवनमध्यवसत्। एलिगिरौ उषित्वा राज्ञी तत्त्वैव सुरक्षितेगह्वरे पुत्रमेकमसूत । सैव पुत्रः मूषिकगिरौ लब्धजन्महेतोः, भृगुपतिरामेण स्वघटात् जलं स्वीकृत्य तं अभिषेकं कृत्वा तत्रत्य नृपतिं चाकरोदित्यतः रामघटमूषिकः अभवत्। पट्टाभिषेकाय भार्गवरामः रामघटमूषकाय मूषकगुच्छं नान्तकखड्गं च अयच्छत्।ततः भृगुपतेः घटपूर्णजलैरभिषेचनात् तत्रत्य नरपतिरभवदिति मूषिकवंशकाव्यादवगच्छामः । स्वमातुः आत्मरक्षायैः सहकृतां लघुनौकां अनुस्मृत्य कोलस्वरूपं इति भाषायामपि प्रसिद्धोऽभवत् । "उडुपं तु प्लवः कोलः" इत्यमरः। गैर्वाण्यां नौकायाः कोल इति सुविदितत्वात् कोलस्वरूप इति प्रयोगः सार्थकमभवत् । 'भूपः कोलं भुवनतिलकम्' 'कोलाभिधानं कुलराजधानिम्' 'पुनरवहन्नृपतिश्चिरायकोलम्' 'कोलभर्तुः' इत्येवं तत्र प्रयोगाः काव्ये दृश्यन्ते ।

केरलेषूत्तरभागेषु स्थलनामसु पल्लि इति नाम्नः पूर्वोत्तरभागेषु संयोजनं कृतवन्तः आसन् । तत्तु क्रैस्तवानां माहम्मदीयानां प्रवर्धनात् पूर्वमेव तादृशनामानि अत्र विद्यमानमसीत् । यथा – पल्लिक्कुलम्, पल्लिक्कुन्न, कटन्नप्पल्लि, काट्टाम्पल्लि, कीष्पल्लि इत्येतासु नामसु कन्नडभाषायाः सहवर्तित्वात् समागताः आसन्। ग्रामस्य कृते तत्र हल्लि इति कथनं दृश्यते । तदत्रापि आनीय कर्णाकर्णिकया पल्लि इत्यभवत् । तद्वत् एव ग्रामसम्बद्ध ऊरु इति प्रयोगः अपि कोट्टियूर्, पय्यावूर्, पेरावूर्, वयत्तूर्, ऊरत्तूर्, कानत्तूर इत्यादयः दृष्टान्ताः अपि दृश्यन्ते। प्रादेशिक नामसु पाश्चात्याभिनिवेशानन्तरं बहुत्र बहुविधपरिवर्तनान्यभवत् इति स्पष्टतया वक्तुं शक्यते। यथा पाल्चरी – पेरलश्शेरि, धर्मपट्टणं-त्रेन्तपडां-धर्मडं, पनियार् – पोन्नानि, भटस्थली – पटच्चेरि, अग्रहारं- अग्रार् निलिम्पपुरं – निलम्पूर् ...

केरलीय नदीषु अधिकतया नीलवर्णयुक्तजलं (मयि – नीलवर्णं ) तस्यां नद्यांअस्ति इत्यतः मयि इति, अपि च समुद्राभिमुखस्थानमित्यतः अषि. इत्यपि सम्मिल्य 'मय्यषि' इत्यभवत् । तथा फ्रञ्च् नाविकेषु प्रमुखः आसीत् 'माहे' तस्य स्मरणार्थम् माहि इत्यपि नाम जातमिति श्रूयते । काव्ये रामघटः वप्रानदीतटेषु यात्रामकरोत् इति परामर्शः दृश्यते । तत्रोक्त वप्रानदिरिदानीं पय्यन्नूर्पुषा पेरुम्पुषा इतिनाम्ना व्यवहृतो दृश्यते । सां यात्रिकाप्रहृतपोतपतावतीर्ण द्वीपान्तरद्रविणसारपृतापणाढ्यम् । किल्लासरिज्जलधिसंगमसन्निकृष्टं माराहिनामसपुरं नृपतिश्चकार ।।

वलभेननिर्मितं 'वलभपत्तनं' वलपट्टणं इति नम्ना अधुना व्यवह्रियते । पेरिञ्चेल्लूर् ग्रामः तलिप्परम्प् इति, किल्लानदिः अधुना कुप्पं पुषा इति च व्यवह्रियन्ते ।

पश्चिमघट्टस्य ब्रह्मगिरेः प्रातुर्भूय बहुभिः नदीभिः सम्मिल्य ब्रह्मगिरिः, इरिट्टि, पेरुमण् पावन्नूर् परशिनिक्कटवु कल्याश्शेरि वलभपत्तनेषु गम्यमाना वलपट्टणं पुषा पूर्वतनगीतेषु नेय्यार् इति व्यवह्रियमाणमासीत् । प्रतना प्रथना घृततटिनी आज्यनदी इत्यादि नामभिरपि व्यवह्रियमाणमासीत् । वावलिप्पुषा एव वलपट्टणं नद्याः मुख्यांशः । कोट्टियूर् उत्सवकाले महदेवाय अभिषेकं क्रियमाणं घृतं जले व्याप्य समुद्रसंगमस्थानं यावत् प्रवहितं इत्यतः घृततटिनी इति नाम अजायत । वलपट्टणं दुर्गस्य निर्माणं द्वितीयेन वलभेन अकारयत् इति काव्ये एवं प्रतिपादितम्। यथा –

भूपश्चकार पृथु गोपुरभिन्नतुङ्ग
प्राकारचित्रविहितातुलगुप्तिशोभम् ।
वर्धिष्णुखातसलिलं पृथुभिस्तरंगैः
बिभ्रत्सदावलभपत्तनवृद्धिमुच्चैः ।।

तस्य दुर्गस्यावशिष्टानि अद्यापि तत्र तत्र विद्यतेत्यतः कोट्टक्कुन्न इति देशं सादरं सर्वे समाह्वयन्ति । मूषकवंशनरपतिना शतसोममहाभागेन चेल्लूर् (पेरिञ्चेल्लूर) नामके ग्रामे संप्रति तलिप्परम्प् इत्याख्ये प्रदेशे बृहन्मन्दिरमेकं निर्मापितवान् । तत्र श्रीपरमेश्वर प्रतिष्ठामकरोत् । सूर्यवंशजातः मान्धाता एव प्रप्रथमं तत्र प्रतिष्ठामकरोत् । कालान्तरे तन्मन्दिरं अप्रत्यक्षोऽभवत् ।

मान्धतुः पुत्रः मुचुकुन्दः पुनरपि प्रतिष्ठामकरोत् । तदपि भूमौ निलीनोऽभवत्। ततः परं मुचुकुन्दपुत्रः शतसोमः तृतीयतम शिवप्रतिष्ठामकरोत् । अपिच सः मन्दिरं निर्मीय पेरिञ्चेल्लूरग्रमवासिभ्यः ब्राह्मणेभ्यः दानञ्चाकरोत् । बृहद्वीवसुतः वटुकवर्मा वटुकेश्वरं मन्दिरं निर्मापितवान् ।

सचकारशुभाकरो भक्त्या मुक्त्यागमार्थया।
आलशुद्धिः …प शाश्वतं वटुकेश्वरम् ।।

तत्र आलशुद्धिः इति परामर्शः दृश्यते वलपट्टणनद्याः उत्तरे तीरे पूर्वस्यां दिशि अरोलि इति देशः विद्यते । तत्र परमेश्वरस्य मन्त्रमूर्ति स्वरूपः भैरवादि पञ्च मूर्तीनां उपासनाचात्र प्राचलत् । एतस्य संस्थापकाः परिपालकाः च चिरक्कल् कोविलकस्थाः आसन् । वटुकः इति भैरवस्य पर्यायवाचित्वात् वटुकेश्वरः कालान्तरे वटेश्वरः समभवत् । पुरोहितानां ब्राह्मणानां अग्निहोत्रादिकं यस्मिन् देशे अनवरतं प्रचलितमासीत् अरण्या अग्नित्रयेन च पवित्रीकृतश्च स देशः अधुना अरोलिः इति नाम्ना व्यवह्रियमाणोऽभवत् । अत्र एव आलशुद्धिः इति नाम्नः आधारश्चापि दृश्यते । अरच् ओलिः अरचग्रामः क्रमेण अरोलिः समभवत् । अहीरणः इति मषिकनरपतिः पृतना नद्याः पश्चिमे तटे अहीरणेश्वरं मन्दिरमं निर्मापितवान् ।

पृतनासरितस्तीरे पश्चिमे पृथ्वीपतिः ।
अहीरणेश्वरं नामधामचक्रे स शूलिनः ।।

एतन्मन्दिरं अहीरणेश्वरः, पाम्पणिच्चेरिः, अधुना पाप्पिनिशेरिः समभवत् । विनयवर्मेति राज्ञः पुत्रः राजवर्मा प्रासादोपेदं मन्दिरमेकं चकारेति काव्ये एवं दृश्यते। यथा

चित्रैरब्रं लिहाग्रैर्यः प्रासादैरुपशोभितम्।
विह- राजनामाङ्क-श्चक्रे रत्नत्रयास्पतम् ।।

रत्नत्रयप्रयोगः बौद्धधर्मसंघानां उचितयारीत्या युज्यते । ‘राजविहारं’, इत्यासीत् पूर्णनाम । अन्यत्र उक्त ‘मूलवासम्’ ‘जिनस्यश्रीनिकेतनम्’ इत्येतौ अनेनसह संबद्धः इत्यवगच्छामः । ईशानवर्मणा जयरागेण सह युद्धसन्नाहः कृतः । स्वीय सैन्येन सह परुष्णीनद्यास्तटे आस्थानमकरोत् । ततः जयरागेण सह घोरयुद्धमकरोत्।

यानदुन्दुभिरवध्वलिताशो वाहिनीभरविनामितभूमिः ।
रेणुजालपिहितान्तरमुच्चैरासुसादसरितं स परुष्णीम् ।।

अत्रोक्त परुष्णीनदी पर्शिनीनद्यासमं शब्दसाम्येन समानमित्यवगच्छामः । जयमानी इतति नृपतेः पश्चादागतः प्रथमवलभः भटस्थली नृपेण सः कृतसङ्गरात् भटस्थलीति देशः स्वसोदराय नृपरामाय अदात् । स एव भटस्थली क्रमेण पटच्चेरिः कालान्तरे वटश्शेरिः समभवत् इति वक्तुं शक्यते ।कुन्दवर्मेति मूषिकनृपतिः नारायणपुरं इति विष्णुमन्दिरं अकारयत् । यथा अभिरक्ष्य पुरं चिराय यो विभवैर्न्यायवशादुपार्जितैः ।

विधितप्रथितं मुरद्विषो भवि नारायणपूर्वकं पुरम् ।।

अयं नारायणपूर्वकं पुरं पश्चात् ‘नारात्’ इति विख्यातो समभवत् । तत्र विष्णु मन्दिरमधुनापि विराजते। पालकः इति नृपतेः शासनकाले मुरिपुरारचः मूषिक राज्यस्य प्रदेशान् स्वायत्तीचकार। पश्चात् पालकः सैन्यसमेतं आक्रमणेन पुनरपि मूषिकाधिपत्यमकारयत् केषाञ्चन वर्षाणां पूर्वं तत्र गृहाणि नासन् । अधुना यथेष्टं रम्यहर्म्याणि प्रदेशेमत्र विराजन्ते । संप्रति एरिपुरं प्रदेशोऽयं व्यह्रियते । एतं प्रदेशमधिकृत्य पोर्तुगीस् लेखे एवं दृश्यते ‘The hamlet of burning fires’ स एव पुरः मरिपुरं एरिपुरं इत्येवं व्यराजते।

वलभानन्तरं राजवर्मेति श्रीकण्ठः वटुकेश्वरं-वटेश्वरं, खरवनमन्दिरं, वैद्यनाथेश्वरः, काञ्चिरङ्गाट्टुमन्दिरं, अहीरणेश्वरं

पाप्पिनिश्शेरि, इत्येतानिमन्दिराणि श्रीकण्ठेन नवीकृतानि । तलिप्परम्पुतः क्रोशमात्र दूरे पूर्वोत्तरदिशि श्रीकण्ठपुरं इति स्थानमपि दृश्यते । तदेव अन्तिम मूषिक नृपतेः आस्थानम् । बहुकालं यावत् मूषिकखण्डमिति वा कोलत्तुनाट् इत्यादिभिः नामभिः प्रसिद्धिमाप्तस्य प्रदेशस्य अस्य नामसु अधुनापि दृश्यमानस्वाधीनं तस्य प्रदेश्य ऐतिहासिकं वैशिष्ट्यं उच्चैस्तरं उद्घोषयति । आधुनिककालमपि काव्यस्य वैशिष्ट्यं जनमनसि रूढमस्तित्यस्य उत्तम निदर्शनान्येव एतानि । भाषादृष्ट्या राष्ट्रीयदृष्ट्या बहुपरिवर्तनानि संजातानि चेदपि काव्येन वंशेन च सह कियदभेद्य बन्धः वर्ततेत्यवगन्तुं शक्नुमः।

**References**


1. Kerala History AR Raghavavariyar
2. Mooshikvamsa of Athula
3. A History of Mooshikavamsa Dr N P Unni
4. Thiranjedutha Prabhandhangal Chirakkal T Balakrishnan Nair.